

महर्षि भरद्वाज प्रणीते श्री यन्त्रसर्वस्वे

वै मा नि क प्र क र ण म्.

प्रथमोऽध्यायः

॥ मङ्गलाचरणम् ॥

यद्विमानगतास्सर्वे यान्ति ब्रह्मपरं पदम् । तं नत्वा परमानन्दं श्रुतिमस्तकगोचरम् ॥
पूर्वाचार्यकृतान् शास्त्रानवलोक्य यथामति । सर्वलोकोपकाराय सर्वानर्थविनाशकम् ॥
त्रयीहृदयसन्दोहसाररूपं सुखप्रदम् । सूत्रैः पञ्चशतै र्युक्तं शताधिकरणैस्तथा ॥
अष्टाध्याय समायुक्त मतिगूढं मनोहरम् । जगता मतिसन्धान कारणं शुभदं नृणाम् ॥
अनायासा द्व्योमयान स्वरूपज्ञानसाधकम् । वैमानिकाधिकरणं कथ्यतेऽस्मि न्यथाविधि ॥५॥

॥ व्याख्यानश्लोकाः ॥

महादेवं महादेवीं वाणीं गणपतिं गुरुम् । शास्त्रकारं भरद्वाजं प्रणिपत्य यथामति ॥
स्वतस्सिद्ध न्यायशास्त्रं वाल्मीकिगणितं तथा । परिभाषाचन्द्रिकां च पश्या न्नामार्थकल्पकम् ॥
पञ्चारं त्रिचार्याथ तत्प्रमाणानुसारतः । बालानां सुखबोधाय बोधानन्दयतीश्वरः ॥
संग्रहाद्वैमानिकाधिकरणस्य यथाविधि । लिलेख बोधानन्दवृत्त्याख्यां व्याख्यां मनोहराम् ॥
व्याख्यालक्षणरीत्यास्य पाणिनीयादिमानतः । पारिभाषिकरूपत्वा द्व्याख्यातुं नैव शक्यते ॥१०॥
प्रारेप्सितस्य ग्रन्थस्य निर्विघ्नेन यथाक्रमम् । परिसमाप्तिप्रचयगमनाय्यां यथाविधि ॥
शिष्टाचार परिप्राप्त मङ्गलाचरणं स्वतः । अनुष्ठाय यथाशास्त्रं शिष्यशिक्षार्थ मादरात् ॥
यद्विमानगतास्सर्वे स्युक्तश्लोका यथाक्रमम् । स्वेष्टदेवनमस्कार रूपं मङ्गल मातनोत् ॥

अर्थात्सूचयति ग्रन्था दनुबन्धचतुष्टयम् । ब्रह्मानुग्रहसंलब्ध वेदराशिः कृपाकरः ॥
निर्मन्थ्य तद्वेदाम्बुधिं भरद्वाजो महामुनिः । नवनीतं समुद्धृत्य यन्त्रसर्वस्वरूपकम् ॥१५॥
प्रायच्छ त्सर्वलोकाना मीप्सितार्थं फलप्रदम् । नानाविमान वैचित्र्य रचनाक्रम बोधकम् ॥
अष्टाध्यायै र्विभजितं शताधिकरणै र्युतम् । सूत्रैः पञ्चशतैर्युक्तं व्योमयानप्रधानकम् ॥
वैमानिकप्रकरणं तस्मिन्नुक्तं महर्षिणा । तत्रादौ मङ्गलश्लोक तात्पर्यं स्सन्निरूप्यते ॥
उत्तरे तापनीये च शैव्यप्रश्ने च काठके । माण्डूक्ये च यथोंकारः परापरविभागतः ॥
उक्तं स्या दारुरुक्षूणां ब्रह्मप्राप्त्यर्थ मादरात् । विमानत्वेन मुनिना तदेवात्रा भिवर्णितम् ॥२०॥
वाच्यार्थ लक्ष्यार्थ भेदा त्तद्द्विधा भिद्यते श्रुतौ । तुरीय एव लक्ष्यार्थः प्रणवस्येति कीर्तितः ॥
तदेवाखण्डैकरसः परमात्मेति चोच्यते । एतदालम्बनं श्रेयु मित्यादि श्रुतिमानतः ॥
गमनार्थं साधकानां भक्त्या तत्परमं पदम् । वाचकप्रणवो ह्यत्र विमान इति वर्णितः ॥
तमारुह्य यथाशास्त्रं गुरूक्तेनैव वर्त्मना । ये विशन्ति ब्रह्मपदं ब्रह्मचर्यादि साधनात् ॥
तदत्र मङ्गलश्लोक रूपेण प्रतिपादितम् । तदर्थबोधक पदान्यष्टश्लोके स्मृतानि हि ॥२५॥
द्वितीयपदत स्तेषु सम्यगुक्ता मुमुक्षवः । स एव कर्तृवाची स्या ज्जीववाचीति चोच्यते ॥
यद्विमानगते त्यत्र वाचकः प्रणवः स्मृतः । विमानत्वेनात्र सम्य क्तदेव प्रतिपादितः ॥
एष एवादिमपदो भवे त्कर्तृविशेषणम् । तुरीयपदतः प्रोक्त मवाङ्मानसगोचरम् ॥
अखण्डैकरसं ब्रह्म प्राप्तव्यस्थान मुत्तमम् । उक्तमेत त्कर्मपद मिति श्लोकान्वयक्रमात् ॥
प्रणवाख्य विमानेन गमनं यत्प्रकीर्तितम् । तत्तृतीय पदेनोक्तं वाच्यलक्ष्यैक्य बोधकम् ॥
क्रियापद मिति प्रोक्तं अन्वयक्रमतः स्फुटम् । विशेषणपदानि स्युः कर्मण स्तीव्रयाक्रमम् ॥
प्रसिद्ध द्योतनार्थाय पञ्चमं पद मीरितम् । तथैव सप्तमपदं नित्यानन्द प्रबोधकम् ॥
सर्व वेदान्त मानत्वबोधार्थं चाष्टमं पदम् । नत्वेति यत्पदं प्रोक्तं तत्प्रह्वीभाव बोधकम् ॥
एतेन तत्त्वमस्यादि वाक्यार्थोक्त मभूत्क्रमात् । यद्विमानगतेत्यत्र त्वं पदत्वेन वर्णितम् ॥
तत्पदार्थत्वेन ब्रह्मपरं पद मितीरितम् । नत्वे त्यैक्यपरामर्शार्थो ऽसिपदार्थ बोधकः ॥ ३५ ॥
इत्थं श्लोका स्तत्वमसि वाक्यार्थ स्सन्निरूपितः । तदर्थैक्या नुसंधान रूप मङ्गलमातनोत् ॥
एवं विधाय विधिव न्मङ्गलाचरणं मुनिः । पूर्वाचार्यांश्च तद्ग्रन्था न्द्वितीयश्लोकतो ऽब्रवीत् ॥
विश्वनाथोक्त नामानि तेषां वक्ष्ये यथाक्रमम् । नारायण श्शौनकश्च गर्गो वाचस्पति स्तथा ॥

चाक्रायणि धुण्डिनाथ श्रेति शास्त्रकृत स्वयम् । विमानचन्द्रिका व्योमयानतन्त्र स्तथैवच ॥
यन्त्रकल्पो यानबिन्दुः खेटयानप्रदीपिका । व्योमयानार्कप्रकाश श्रेति शास्त्राणि षट् क्रमात् ॥
नारायणादि मुनिभिः प्रोक्तानि ज्ञानचक्षुभैः । विचार्यैतानि विधिव द्भरद्वाजः कृपानिधिः ॥
वैमानिकाधिकरणं सर्वलोकोपकारकम् । पारिभाषिकरूपेण रचयामास विस्तरात् ॥ ४२ ॥

॥ इति लक्षणाधिकरणम् ॥

॥ अथ विमानशब्दार्थविचारः ॥

सू. १. वेगसाम्या द्विमानो ऽण्डजानामिति ॥

बोधायनवृत्तिः —

अण्डजे त्यत्र सूत्रेऽस्मि न्गृध्राद्याः पक्षिणः स्मृताः । आकाशगमने तेषां वेगशक्तिः स्ववेगतः ॥
यस्समर्थो विशेषेण मातुं गणितसंख्यया । स विमान इति प्रोक्तो वेगसाम्याच्च शास्त्रतः ॥

यद्वा

गृध्रादिपक्षिणां वेगसाम्ये यस्यास्ति वेगतः । स विमान इति प्रोक्तो आकाशगमने क्रमात् ॥ इति इत्थं भावेति शब्दस्या द्विमानार्थ विनिर्णये ॥ ॥ ४५ ॥

लल्लोपि — विसोपमाने गमने येषामस्ति खमण्डले ।
ते विमाना इति प्रोक्ता यानशास्त्रविशारदैः ॥

नारायणोपि — पृथिव्य प्यन्तरिक्षेषु खगव द्वेगत स्वयम् ।
यस्समर्थो भवेद्गन्तुं स विमान इति स्मृतः ॥

शेखोऽपि — स्थानात्स्थानान्तरं गन्तुं यस्समर्थः खमण्डले ।
स विमान इति प्रोक्तो यानशास्त्र विशारदैः ॥

विश्वम्भरः — देशाद्देशान्तरं तद्वद् द्वीपाद् द्वीपान्तरं तथा ॥
लोका ल्लोकान्तरं चापि योऽम्बरे गन्तु महंति। स विमान इति प्रोक्तो खेटशास्त्रविदां वरैः ॥
इत्यादि ।
एवं विमानशब्दार्थं उक्त्वा शास्त्रानुसारतः । अथेदानीं तद्रहस्यविचार स्संप्रकीर्त्यते ॥५०॥

२. यन्त्राधिकाराधिकरणम्

सू. २. रहस्यज्ञोऽधिकारी.

बोधायनवृत्तिः –

वैमानिकरहस्यानि यानि प्रोक्तानि शास्त्रतः । द्वात्रिंशदिति तान्येव यानयन्तृत्व कर्मणि ॥
साधकानि भवन्तीति यदुक्तं ज्ञानिभिः पुरा । तत्सूत्रस्यादिमपदा त्सूचितं भवति स्फुटम् ॥
एतद्रहस्यविज्ञानं विदितं येन शास्त्रतः । द्वितीयपदतः प्रोक्तं सोऽधिकारी भवेदिति ॥
एतेन यानयन्तृत्वे रहस्यज्ञानमन्तरा । सूत्रेऽधिकार संसिद्धि र्नेति सम्य ग्विनिर्णितम् ॥
विमानरचने व्योमारोहणे चालने तथा ॥
स्तम्भने गमने चित्रगति वेगादि निर्णये । वैमानिक रहस्यार्थ ज्ञानसाधन मन्तरा ॥
यतोधिकार संसिद्धि र्नेति सूत्रेण वर्णितम् । ततोधिकारसंसिद्ध्यै तद्रहस्या न्यथाक्रमम् ॥
यथोक्तानि रहस्यलहर्यां लल्लादिभिः पुरा । तथैवोदाहरिष्यामि संग्रहेण यथामति ॥

उक्तं हि रहस्यलहर्याम् –

मान्त्रिको तान्त्रिक स्तद्वत्कृतक श्चान्तराळकः । गूढो दृश्य मदृश्यं च परोक्ष श्चापरोक्षकः ॥
सङ्कोच विस्तृतश्चैव विरूपकरणस्तथा । रूपान्तर स्सुरूपं च ज्योतिर्भाव स्तमोमयः ॥
प्रळयो विमुख स्तारो महाशब्दविमोहनः । लङ्घन स्सार्पगमन श्चापल स्सर्वतोमुखः ॥ ६० ॥

परशब्दग्राहकश्च रूपाकर्षणकस्तथा । क्रियारहस्यग्रहणो दिक्प्रदर्शनमेव च ॥
आकाशाकाररचना जलदाकृतिरेव च । स्तब्धको कर्षणश्चेति रहस्यानि यथाक्रमम् ॥
सर्वाण्येतानि द्वात्रिंशद्रहस्यानि गुरोर्मुखात् । विज्ञाय विधिवत्सर्वं पश्चात्कार्यं समारभेत् ॥
एतद्रहस्यानुभवो यस्यास्ति गुरुबोधतः । स एव व्योमयानाधिकारी स्या नेतरे जनाः ॥
इत्यादि ।

एतेषां सिद्धनाथोक्तरहस्यार्थविवेचनम् । संग्रहेण प्रवक्ष्यामि रहस्यज्ञानसिद्धये ॥ ६५ ॥

१. तत्र मान्त्रिकरहस्यो नाम ॥

मन्त्राधिकारोक्तरीत्या छिन्नमस्ता, भैरवी, वेगिनी, सिद्धाम्बादिमन्त्रानुष्ठानादुपलब्ध सिद्धमार्गोक्त गुटिका, पादुका, दृश्यादृश्यादिशक्तिभिः तथा सिद्धाम्बा ओषधीश्वर्यादि मन्त्रानुष्ठानैः संप्राप्त ओषधीभिस्तद्द्रावकतैलादिभिश्च भुवनेश्वर्यादिमन्त्रानुष्ठानलब्ध मन्त्रशक्तिक्रियाशक्तिभिश्च कलासंयोजनद्वारा अभेद्यत्व अच्छेद्यत्व अदाह्यत्व अविनाशित्वादि गुणविशिष्टविमानरचनाक्रियारहस्यम् ॥

२. तान्त्रिकरहस्यो नाम ॥

महामाया शम्बरादि तान्त्रिकशास्त्रोक्तानुष्ठानमार्गा त्तत्तच्छक्त्यनुसन्धानरहस्यम् ॥

३. कृतकरहस्यो नाम ॥

विश्वकर्म, छायापुरुष, मनु, मयादि शास्त्रानुष्ठानद्वारा तत्तच्छक्त्यनुसन्धान-पूर्वकं तात्कालिकसङ्कल्पानुसारेण विमानरचनाक्रमरहस्यम् ॥

४. अन्तराळरहस्यो नाम ॥

आकाश परिधिमण्डल शक्ति सन्धिस्थानेषु विमानप्रवेशो यदा भवति, तदा उभयशक्तिसंमर्दनेन चूर्णितो भवति । अतः विमानस्य तत्सन्धिप्रवेशसूचनात्तदन्तरालेषु विमानस्तम्भनक्रियारहस्यम् ॥

५. गूढरहस्यो नाम ॥

वायुतत्वप्रकरणोक्तरीत्या वातस्तम्भाष्टम परिधिरेखापथस्थ यासा, वियासा, प्रयासादि वातशक्तिभिः सूर्यकिरणान्तर्गत तमदशक्तिमाकृष्य तत्संयोजनद्वारा विमाना-च्छादनरहस्यम् ॥

६. दृश्यरहस्यो नाम ॥

आकाशमण्डले विद्युद्वात किरणशक्त्योः परस्परसंमेलनात् सञ्जात विम्बकृच्छक्तेः विमानपीठपुरोभागस्थ विश्वक्रियादर्पणबिले प्रतिफलनं कृत्वा पश्चात्तत्प्रकाशसंनिवेशन-द्वारा मायाविमानप्रदर्शनरहस्यम् ॥

७. अदृश्यरहस्यो नाम ॥

शक्तितन्त्रोक्तरीत्या सूर्यरश्मेरादण्ड प्राङ्मुख पृष्ठकेन्द्रस्थ वैणरथ्य विकरणादि-शक्तिभिः आकाशतरङ्गस्थ शक्तिप्रवाहमाकृष्य वातमण्डलस्थ बलाहाविकरणादिशक्तिपञ्चके नियोज्य तद्द्वारा श्वेताभ्रवन्मण्डलाकारं कृत्वा तदावरणात् विमानादृश्यकरणरहस्यम् ॥

८. परोक्षरहस्यो नाम ॥

मेघोत्पत्तिप्रकरणोक्त शरन्मेघावरणपट्केषु द्वितीयावरणपथे विमानमन्तर्धाय, विमानस्थ शक्त्याकर्षण दर्पणमुखा तन्मेघशक्तिमाहृत्य पश्चा द्विमानपरिवेषचक्रमुखे निवेशयेत् । तेन स्तम्भनशक्तिप्रसारणं भवति । पश्चात्तद्द्वारा लोकस्तम्भनक्रिया-रहस्यम् ॥

९. अपरोक्षरहस्यो नाम ॥

शक्तितन्त्रोक्तरोहिणीविद्युत्प्रसारणेन विमानाभिमुखस्थवस्तूनां प्रत्यक्षनिदर्शन-क्रियारहस्यम् ॥

१०. सङ्कोचनरहस्यो नाम ॥

यन्त्राङ्गोपसंहाराधिकारोक्तरीत्या अन्तरिक्षे अतिवेगात् पलायमानानां विस्तृत-खेटयानानां अपायसम्भवे विमानस्थससमकीलीचालनद्वारा तत्तदङ्गोपसंहारक्रियारहस्यम् ॥

११. विस्तृतरहस्यो नाम ॥

आकाशतन्त्रोक्तप्रकारेण आकाशतृतीयपञ्चम परिधिमण्डलस्थानीय मूलवात-परिधिकेन्द्रस्थ विमानानां वाल्मीकिगणितोक्त विमानप्रस्तारस्थरेखाविन्यासमनुसृत्य विमानस्थ एकादशरेखामुखस्थानीय कीलोच्चालनद्वारा तात्कालिकोपयुक्त विमानविस्तृतक्रिया-करणरहस्यम् ॥

१२. विरूपकरणरहस्यो नाम ॥

धूमप्रकरणोक्तप्रकारेण द्वात्रिंशज्जातीयधूमराशिं यन्त्रद्वारा परिकल्प्य तस्मिन् खतरङ्गशक्त्युष्णसंजनितप्रकाशं मेलयित्वा पश्चात् विमानशिरोभागस्थ भैरवीतैलसंस्कारित वैरूप्यदर्पणमुखे पद्माकचक्रमुखनालद्वारा पूर्वोक्तप्रकाशशक्तिं सन्धार्य द्वात्रिंशदुत्तरशत-कक्ष्यप्रमाणवेगात् परिभ्राम्यमाणे सति मण्डलाकारेण महाभयप्रदविकाराकारो जायते। विमानद्रष्टृणां तत्प्रदर्शनद्वारा महाभयोत्पादनकार्यरहस्यम् ॥

१३. रूपान्तररहस्यो नाम ॥

तैलप्रकरणोक्तप्रकारेण गृध्रजिह्वा, कुम्भिणी, काकजङ्घादितैलसंस्कारितवैरूप्यदर्पणे एकोनविंशज्जातीयधूमं संयोज्य, तस्मिन् यानस्थकुण्टिणीशक्तिसंयोजनद्वारा विमानद्रष्टृणां सिंह, व्याघ्र, भल्लूक, सर्प, गिरि, नदी, वृक्षादिविकारेण अन्यथाकल्पितरूपान्तर प्रदर्शनरहस्यम् ॥

१४. सुरूपरहस्यो नाम ॥

करकप्रकरणोक्तत्रयोदशजातीयकरकशक्तिमाकृष्य हिमोद्गारवायुना संधार्य पश्चात् विमानदक्षिणकेन्द्रमुखस्थित पुष्पिणी पिञ्जुलादिदर्पणमुखे पूर्वोक्तशक्तिं वातप्रसारण-नालद्वारा संयोज्य, तस्मिन् सुरघाख्यशक्तिं सन्धाय, तद्द्वारा विमानसन्दर्शकानां विविधपुष्पमाल्योपसेवित दिव्याप्सरस्वरूपवत् विकारसंदर्शनक्रियारहस्यम् ॥

१५. ज्योतिर्भावरहस्यो नाम ॥

अंशुबोधिन्यामुक्तप्रकारेण संज्ञानादिषोडशसूर्यकलासु द्वादशाद्यषोडशान्त कला-प्रभाकर्षणं कृत्वा आकाशचतुर्थपथस्थ मयूखकक्ष्यस्थितवायुमण्डले नियोजयेत् ॥

तथैव खतरङ्गशक्तिप्रभामाहत्म्य वातमण्डल सप्तमावरणस्थ प्रभाशक्त्या संमेलयेत् । पश्चादेतत् शक्तिद्वयं विमानस्थनाळपञ्चकद्वारा विमानगुहागर्भदर्पणयन्त्रतृतीयकोशे सन्धार्य तद्द्वारा विमानद्रष्टृणां बालातपवत् प्रकाशप्रदर्शनरहस्यम् ॥

१६. तमोमयरहस्यो नाम ॥

दर्पणप्रकरणोक्त तमोशक्त्यपकर्षणदर्पणद्वारा तमश्शक्तिमाहत्म्य विमानपञ्जर-वायव्यकेन्द्रस्थ तमोयन्त्रमुखात् तमोविद्युति सन्धाय तत्कीलीचालनात् मध्याह्नकाले अमारात्रिवत् तमोविकारप्रदर्शनरहस्यम् ॥

१७. प्रळयरहस्यो नाम ॥

ऐन्द्रजालिकप्रळयपटलोक्तरीत्या यानपुरोभागकेन्द्रस्थ उपसंहारयन्त्रनाळात् सप्तम-जातीयधूममाकृष्य षड्गर्भविवेकोक्त मेघधूमेऽन्तर्धाय तद्धूमं विद्युत्संसर्गात् पञ्चस्कन्ध-वातनाळमुखेषु प्रसार्य तद्द्वारा सर्वपदार्थानां प्रळयवत् नाशक्रियाकरणरहस्यम् ॥

१८. विमुखरहस्यो नाम ॥

ऋक्हृदयोक्तप्रकारेण कुबेरविमुखवैश्वानरादि विषचूर्णशक्तीः रौद्रीदर्पणपञ्जर-तृतीयनाळे नियम्य वातस्कन्धकीलीचालनद्वारा मूर्छावस्थाप्रदानेन विवर्णकरणक्रिया-रहस्यम् ॥

१९. तारहस्यो नाम ॥

वातजलसूर्यकिरणप्रभाशक्तीनां दशसप्तषोडशांशान् खतरङ्गशक्त्या संयोज्य, तच्छक्तिं तारमुखदर्पणद्वारा विमानमुखकेन्द्रशक्तिनाळमुखप्रसारणात् सर्वेषां नक्षत्र-मण्डलवत् प्रदर्शनक्रियारहस्यम् ॥

२०. महाशब्दविमोहनरहस्यो नाम ॥

विमानस्थसप्तनाळवायुमेकीकृत्य शब्दकेन्द्रमुखे अन्तर्धाय पश्चात् तत्कीलीं प्रचालयेत् । तद्वेगात् शब्दप्रकाशकोक्तरीत्या द्विषष्टिघ्मानकलासङ्घट्टनशब्दवत् महान् शब्दो जायते । तच्छब्दस्मरणात् सर्वेषां हृदयकम्पनं भवति । किञ्कुत्रयप्रमाणकम्पनं यदा भवति तदा स्मृतिविस्मरणं भवति । तत्द्वारा परेषां विमोहनक्रियारहस्यम् ॥

२१. लङ्घनरहस्यो नाम ॥

वायुतत्वप्रकरणोक्तप्रकारेण वातमण्डलपरिधिरेखासु विमानसञ्चारकाले यदा सूर्यगोळवाडवामुखकिरणज्वालाप्रवाहः विमानाभिमुखो भवति तेन विमानः प्रज्वलितो भवति । अतस्तन्निवारणार्थं विमानस्थविद्युद्घातशक्तिमेकीकृत्य, विमानस्थप्राणकुण्डली-स्थाने सन्धाय पश्चात् कोलीचालनेन विमानोड्डीयनद्वारा कुल्यालङ्घनवत् रेखाद्रेखान्तर-लङ्घनक्रियारहस्यम् ॥

२२. सर्पगमनरहस्यो नाम ॥

दण्डवक्त्रादि सप्तविध मातरिश्वार्ककिरणशक्तीराकृष्य यानमुखस्थ वक्त्रप्रसारण-केन्द्रमुखे नियोज्य पश्चात्तदाहृत्य शक्त्युद्गमनाळे प्रवेशयेत् । ततः तत्कीलीचालनात् विमानस्य सर्पवत् गमनक्रियारहस्यम् ॥

२३. चापलरहस्यो नाम ॥

शत्रुविमानसंदर्शनकाले विमानमध्यकेन्द्रस्थ शक्तिपञ्जरकीलीचालनेन एक-कोटिकाबच्छिन्नकाले सप्ताशीत्युत्तरचतुस्सहस्रमहातरङ्गवेगो जायते । तत्प्रसारणात् शत्रुविमानकम्पनक्रियारहस्यम् ॥

२४. सर्वतोमुखरहस्यो नाम ॥

खपथे स्वविमानविनाशनार्थं परविमानशतैः आवृते सति तदा स्वविमानशिरः-केन्द्रकोलीचालनादनेकविमानवत् सर्वतोमुखसञ्चारक्रियारहस्यम् ॥

२५. परशब्दग्राहकरहस्यो नाम ॥

सौदामिनीकलोक्तप्रकारेण विमानस्थ शब्दग्राहकयन्त्रद्वारा आकाशप्रथममण्डल-परिधिमारभ्य सप्तममण्डलपर्यन्तं परविमानस्थ जनसंभाषणादिसर्वशब्दाकर्षणरहस्यम् ॥

२६. रूपाकर्षणरहस्यो नाम ॥

विमानस्थ रूपाकर्षणयन्त्रद्वारा परविमानस्थित वस्तुरूपाकर्षण रहस्यम् ॥

२७. क्रियाग्रहणरहस्यो नाम ॥

विमानाधःकीलीचालनात् शुद्धपटप्रसारणं भवति । ईशान्यकोणस्थद्रावकत्रये शक्तिसंयोजनं कृत्वा तच्छक्तिं सप्तमवर्गसूर्यकिरणेषु सन्धार्य तत्किरणान् त्रिशीर्षदर्पण-नाळदण्डेऽन्तर्धाय पूर्वोक्तशुद्धपटं दर्पणाभिमुखीकरणं कृत्वा तन्मुखात्पूर्वोक्तशक्ति-प्रसारणपूर्वकार्धकीलीचालनद्वारा विमानाधोभागस्थित पृथिव्यन्तरिक्षेषु यद्यत्क्रिया-रहस्याणि अन्यैः क्रियन्ते तत्स्वरूपप्रतिबिम्बः शुद्धपटे मूर्तवच्चित्रितो भवति । तद्द्वारा क्रियाग्रहणरहस्यम् ॥

२८. दिक्प्रदर्शनरहस्यो नाम ॥

विमानमुखकेन्द्रकीलीचालनेन दिशांपतियन्त्रनाळपत्रद्वारा परयानागमनदिक्प्र-दर्शनरहस्यम् ॥

२९. आकाशरहस्यो नाम ॥

आकाशतन्त्रोक्तरीत्या कृष्णाभ्रवारिणा पिचुकन्दमूलभूनागद्रावकाभ्यां यानावर-णाभ्रकपट्टिकामालिप्य तस्मिन् वायुपथकिरणशक्तिसंयोजनद्वारा विमानमाकाशाकार-वत्प्रदर्शनरहस्यम् ॥

३०. जलदरूपरहस्यो नाम ॥

करकाम्ल बिल्वतैल शुल्बलवण धूमसार ग्रन्थिकरस सर्षपपिष्ट मीनावरणद्रवाणां शास्त्रोक्तप्रकारेण भागांशसंमेलनं कृत्वा, मुक्ताफलशुक्तिकालवणसारे संयोज्य सम्मि-